International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(4): 74-76
© 2026 IJMH
www.themultijournal.com
Received: 27-06-2026
Accepted: 20-07-2026
Publish : 21-07-2026

**श्रीमति अरुन्धती नायक**
शोधछात्रा, ज्योतिषवास्तुविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः
अनुक्रमाङ्कः - 22VVPJ003

**Correspondence:**
**श्रीमति अरुन्धती नायक**
शोधछात्रा, ज्योतिषवास्तुविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# होरास्कन्धोक्ताध्यात्मयोगानां परिशीलनम्

**श्रीमति अरुन्धती नायक**

(**सारांशः -** कलिकालेऽस्मिन् जनाः स्व स्वार्थसिद्धये निरन्तरं धवमानाः प्रवर्त्तमानाः च सन्ति। तस्मात् कारणात् धर्माचरणं धर्मपरिपालनं च अनुदिनं क्षीयते। अतः तादृशाणाम् अध्यात्मचेतसां अन्वेषणाय एतद् लघुप्रयासः आचर्यते। सिद्धान्त-संहिता-होरेति त्रिस्कन्धज्योतिषशास्त्रस्य होरास्कन्धपक्षीयग्रन्थेषु बहवः अध्यतमयोगाः प्राप्यन्ते। तेषां योगानां प्रायोगिकमध्ययनं भवतु इति धीया इदं शोधपत्रं प्रस्तुतं वर्तते।)

**उपक्रमः -**

वेदवेदाङ्गादिचतुर्द्दशविद्यानाम् एकमेवलक्षं वर्तते **"अथातो ब्रह्मजिज्ञाषा"** इति। अतोऽत्र ब्रह्मजिज्ञाषायै तत् तच्छास्त्रेष्वनेकाः मार्गाः पायाः वा विहिताः। वेदाङ्गशास्त्रेषु ज्योतिषशास्त्रं वेदपुरुषस्य चक्षूरूपकमङ्गं वर्तते। अस्य ब्रह्मविद्याख्यवेदाङ्गशास्त्रस्य ज्योतिषशास्त्रस्यास्य अध्यात्मचिन्तनं सिद्धान्तसंहिताहोरेति त्रिषु स्कन्धेषु समुपलभ्यते। **सिद्धान्तस्कन्धे** व्यक्ताव्यक्तगणितं ब्रह्मतत्त्वेन सह समन्वयनं क्रियते। **"कालः एव ईश्वरः, इश्वरे एव कालः"** इति कालमाधवकारस्य श्रीमन्माधवाचार्यस्य वचनं वर्तते। कालविधानाख्ये ज्योतिषशास्त्रे कालस्य स्वरूपं, भेदः, प्रकारश्च वर्णनावसरे अध्यात्मचेतना ब्रह्मतत्त्वञ्च प्रतिस्फुरति। **संहितास्कन्धे** ग्रहाणां सञ्चारविचारे, सप्तर्षिविचारे, अगस्त्यवर्णनावसरे, वास्तुप्रसङ्गे (वनसम्प्रवेश-प्रासाद-प्रतिमाध्यायेषु), सृष्टिक्रमविचारे, नक्षत्राणां करणानां च शुभाशुभफलविचारे तथा ग्रहोपचारादिषु बहुषु विषयेषु च अध्यात्मचेतना निर्लक्षते। तथैव **होरास्कन्धे** ग्रहपिण्डेषु दैवांशविचारावसरे, सूर्यादिग्रहबिम्बाद्भगवतः अवताराविर्भावविचारप्रसङ्गे, होरास्कन्धस्य महत्त्वविचारावसरे किञ्च जातकपरिशीलने अध्यात्मयोगाः चिन्त्यन्ते। अतोऽत्र ज्योतिषशास्त्रस्य होरास्कन्धे जातकविचारावसरे अध्यात्मयोगाः परिशीलिताः सन्ति। तद्यथा -

***ब्रह्मपदप्राप्तियोगः* - चापांशे कर्कटे लग्ने तस्मिन् देवेन्दुपूजिते।**
**त्रिचतुर्भिर्ग्रहैः केन्द्रे जातो ब्रह्मपदं ब्रजेत्।। 105।।**
*(जातकपारिजातस्य अरिष्टाध्यायः)*

कर्कलग्ने, धनुर्नवांशलग्ने, लग्नस्थे गुरौ तथा कन्द्रे त्रयः वा चत्वारः ग्रहाः स्थिताः भवेयुः चेत् जातकस्य ब्रह्मपदप्राप्तियोगो वाच्यः।

***मुनित्वप्रदायकयोगः* - एकांशभागौ गुरुसूर्यपुत्रौ धर्मस्थितौ वा यदि कर्मसंस्थौ।**
**अर्कोदये सौम्यनिरीक्ष्यमाणौ मुनिर्भवेदत्र भवश्चिरायुः।।98।।**
*(जातकपारिजातस्य अरिष्टाध्यायः)*

एकस्मिन् नवांशराशौ शनिगुरू, नवमभावे, दशमभावे च तथैव गुरुशनी तिष्ठतः, लग्नस्थः सूर्यः शुभग्रहेण संदृष्टः चेत् जातकः मुनित्वप्रदयोग्यो भवति।

***देवसादृश्ययोगः* - त्रिकोणे पापनिर्मुक्ते केन्द्रे सौम्यविवर्जिते।**
**रन्ध्रे पापविहीने च जातस्त्वमरसन्निभः।।100।।**
*(जातकपारिजातस्य अरिष्टाध्यायः)*

यस्य जातके त्रिकोणभावाः पापग्रहमुक्ताः, केन्द्रभावाः शुभग्रहमुक्ताः अर्थात् त्रिकोणे शुभाः, केन्द्रे पापाः भवेयुः किञ्च अष्टमभावः पापविहीनः चेत् जातकः देवलुल्यो भवति।

***अंशावतारयोगः* - केन्द्रगौ सितदेवेज्यौ स्वञ्चे केन्द्रगतेऽर्कजे।**
**चरलग्ने यदा जन्म योगोऽयमवतारजः।।160।।** *(जातकपारिजातस्य राजयोगाध्यायः)*

चरलग्ने गुरुशुक्रौ केन्द्रंगतौ, स्वोच्चंगतः शनिः केन्द्रस्थः चेत् जातकः अवश्यम् अंशावतारः भवति।

*धर्मात्मायोगः -* **गुरुशुक्रबुधांशस्थे धर्मनाथेन वीक्षिते**
**शुभग्रहाणां मध्यस्थे धर्मकृत्स नरो भवेत्।।95।।**
*(जातकपारिजातस्य भावफलाध्यायः)*

यः ग्रहः गुरोः, शुक्रस्य अथवा बुधस्य नवांशे तिष्ठति तथा भाग्येशः शुभग्रहैः दृष्टः अथवा शुभग्रहमध्यस्थः चेत् जातकः धर्मात्मा भवति।

*ब्रह्मोपासकयोगः -* **देवलोकांशकस्थे वा कर्मेशे भाग्यपेऽथ वा।**
**पारावतांशके सौम्ये दृष्टे सुब्रह्मनिष्ठता।।104।।**
**देवलोकादिभागस्थे कर्मेशे भाग्यपेऽपिवा।**
**पारावतांशके सौम्ये ब्रह्मनिष्ठापरो भवेत् ।।102।।**
*(जातकपारिजातस्य भावफलाध्यायः)*

दशमेशः नवमेशः वा यदि देवलोकादिवैशेषिकांशे स्थितः शुभग्रहाः पारावतादिवर्गस्थाः भवेयुः सः जातकः ब्रह्मोपासकः भवति।

यस्य जन्मकुण्डल्याम् अध्यात्मयोगस्य स्वरूपं वर्तते सः मानवः अवश्यं धर्मात्मा, परोपकारी, समाजसवी, सत्कर्मनिष्ठः, नित्यनिरन्तरदैवचिन्तकः, धर्मप्रचारकः तथा भक्तिरसामृताभिलाशी च भवति। अनेन प्रकारेण अध्यात्मयोगविशिष्टस्य जनस्य आचरणं परिलक्ष्य, अध्यात्मयोगस्य लक्षणमपि निर्णेतुं शक्यते इति।

*तापसयोगः -* **देवलोकांशके मन्दे भौमे पारावतांशके।**
**सिंहासने गुरौ लग्ने जातो मुनिसमो भवेत्।।103।।**
*(जातकपारिजातस्य भावफलाध्यायः)*

शनिः देवलोकांशे, कुजः पारावतांशे गुरुः सिंहासनांशे एवं स्थिते लग्ने जातकः मुनिसमो भवेत्।

*जपध्यानसमाधियोगः -* **सौम्ये चराद्यभागस्थे भाग्येशे बलसंयुते।**
**गुरुशुक्रयुते दृष्टे जपध्यानसमाधिमान्।।101।।**
*(जातकपारिजातस्य भावफलाध्यायः)*

शुभग्रहाः चरराशेः प्रथमनवांशे (वर्गोत्तमांशे) किञ्च भाग्येशः बली वर्तते, गुरुशुक्राभ्यां सः भाग्येशः सन्दृष्टः युतः चेत् जातकः जपध्यानसमाधिषु मग्नो भवति।

**कर्मेशे भाग्यराशिस्थे भाग्येशे बलसंयुते।**
**गुरुशुक्रयुते दृष्टे जपध्यानसमाधिमान्।।102।।**
*(जातकपारिजातस्य भावफलाध्यायः)*

दशमेशः भाग्येशस्य गृहे, भाग्येशः बलवान् किञ्च गुरुशुक्राभ्यां विक्षितः युतश्चज्जातकः जपध्यानसमाधिषु निरतो भवति।

**कर्मेशयुक्तराश्यंशराशीशे बलसंयुते।**
**तदीशे भाग्यसम्बन्धे जपध्यानसमाधिमान्।।103।।**
(सर्वार्थचिन्तामणेः भावविचाराध्ययः)

दशमेशः यस्मिन् राशौ वर्तते अथवा कर्मेशः यस्मिन् नवांशराशिगतो भवति किञ्च सः खेशः बलवान् अस्ति तद् तद् राशीशः भाग्येशेन सह सम्बन्धं करोति चेत् ज्ञातकः जपध्यानसमाधिमान् भवति।

*ब्रह्मवादिनीयोगः -*

**बलिभिर्बुधगुरुशुक्रैः शशाङ्कसहितैर्विलग्नगैः समभे।**
**स्त्री ब्रह्मवादिनी स्यादनेकशास्त्रार्थकुशला च।।31।।**
(सारावल्यां स्त्रीजातकाध्याये)

समराशिगते लग्ने चन्द्रेण सह स्थिताः बलवन्तः बुधगुरुशुक्राः चेत् तर्हि काचित् नारी ब्रह्मवादिनी अनेकशास्त्रार्थकुशला च जायते।

*सन्यासिनीयोगः -*

**क्रूरे यामित्रगते नवमे यदि खेचरो भवति नूनम्।**
**आप्नोति प्रव्रज्यां पापग्रहसम्भवामवला।।30।।**
(सारावल्यां स्त्रीजातकाध्याये)

यदि स्त्रीकण्डल्यां सप्तमभावे पापग्रहाः वर्तन्ते तथा नवमभावे कोऽपि ग्रहः अस्ति तर्हि सा स्त्री सन्यासिनी (प्रव्रज्या) भवति।

*पुण्यकर्मायोगः -* **बुधदृष्टियुते सौख्ये सौम्यमध्यगतेऽथवा ।**
**जीवराश्यंशके वाऽपि पुण्यकर्मरतः सदा।। 82।।**
(जातकपारिजातस्य चतुर्थभावफलाध्यायः)

चतुर्थभावः शुभकर्तरी स्यात् नाम तृतीयपञ्चमस्थानयोः शुभग्रहाः वर्तन्ते, तस्मिन् चतुर्थभावे बुधस्य स्थितिः दृष्टिः वा अस्ति तदपि चतुर्थस्थानं गरोः राशिः, बुधोऽपि गुरोर्नवांशे विद्यते चेत् जातकः सर्वदा पुण्यकर्मरतो भवति।

*मुनियोगः युगान्तायुः आदियोगः -*

**धर्मेश्वरे धर्मगते च यस्य भौमांशकस्थे हिमगौ च दृष्टे।**
**मुनीश्वरोऽयं मुनियोगजातः शास्त्रार्थकर्ता युगमादधाति।।112।।**
(सर्वार्थचिन्तामणेः भावविचाराध्ययः)

नवमेशः नवमस्थाने चन्द्रः भौमस्य नवांशे किञ्च भाग्येशेन सन्दृष्टश्चेत् जातकोऽयं मुनीश्वरः शास्त्रार्थकर्ता सन् युगान्तरं विख्यातो भवति।

*गङ्गास्नान तथा मुक्तिफलप्रदयोगः -*

**मीने कर्मणि चन्द्रजारसहिते जातः स मुक् भवेत्।।2।।**
(जा.पा. 15-अध्यायः)

दशमभावगते मीनराशौ बुधकुजौ तिष्ठतः तर्हि जातकः मुक्तिं प्राप्नोति।

*धर्माध्यक्षयोगः -* **गुरौ वा भृगुपुत्रे वा स्वोच्चमित्रांशके शुभे।**
**धर्माधिपे बलयुते धर्माध्यक्षो नरो भवेत्।।69।।**
(सर्वार्थचिन्तामणेः भावविचाराध्ययः)

बलवान् गुरुः वा शुक्रः स्वोच्चांशे मित्रनवांशे स्थित्वा यदि शुभधर्माधिपेन सह सम्बन्धः करोति तर्हि जातकः धर्मकार्येषु आध्यक्ष्यमावहति नाम परमधर्मशीलो जायते इत्यर्थः।

*धर्मवान् योगः –* **गुरुशुक्रबुधांशस्थे धर्मनाथे शुभेक्षिते।**
**शुभग्रहाणां मध्यस्थे धर्मभाक्स नरो भवेत्।।70।।**
(सर्वार्थचिन्तामणेः भावविचाराध्ययः)

गुरोः शुक्रस्य बुधस्य वा नवांशे स्थितः धर्माधिपः यदि शुभग्रहेण वीक्षितः शुभग्रहयोर्मध्ये स्थितो वा चेत् जातकः परमधर्मी भवति।

*दम्भी धर्मवान् योगः –*

**सौम्यान्विते धर्मगृहे तस्मिन् पापांशसंयुते।**
**क्रूरषष्ट्यंशके वापि दम्भाद्धर्मपरिग्रहः।।71।।**
(सर्वार्थचिन्तामणेः भावविचाराध्ययः)

नवमस्थाने शुभग्रहाः वर्तन्ते ते च शीभग्रहाः पापग्रहस्य नवांशराशौ स्थिताः भवेयुः किञ्च षष्ट्यंशकुण्डल्यां क्रूरग्रहस्य राशौ वर्तन्ते चेज्जातकः दम्भी धर्मवान् च भवति।

***धर्मेण दृढबुद्धियोगः –***

**धर्मेश्वरे सौम्ययुते तदंशे वैशेषिकांशे त्वथ वा तदीशे।**
**क्रूरादिषष्ट्यंशविवर्जिते स्याज्जातस्तु धर्मे दृढबुद्धियुक्तः।।68।।**

(सर्वार्थचिन्तामणेः भावविचाराध्ययः)

नवमेशः नवमभावस्थनवांशे नाम वर्गोत्तमनवांशे वर्तते अथवा वैशेषिकांशे तिष्ठति परन्तु क्रूरग्रहस्य षष्ट्यंशे न वर्तते चेत् जातकः धर्मकार्येषु दृढबुद्धियुक्तश्च जायते।

***पवित्रतापूर्वकधर्मवान् योगः -***

**नाथकारकभावानमंशे शुभसमन्विते।**
**शुभांशे शुसन्दृष्टे शुचितो धर्मसंयुतः।।72।।**

(सर्वार्थचिन्तामणेः भावविचाराध्ययः)

कारकेशः कारकभावनवांशे शुभग्रहैः सह सम्बयुक्तः

***सन्यासयोगः -*** **केन्द्रे त्रिकोणे खेटैश्च चतुर्भिः सह कर्मपैः।**
**युक्तेश्चैते कर्मयुक्तैः प्रव्रज्याऽस्य भवेद्ध्रुवम्।।32।।**

(दैवज्ञाभरणस्य अष्टादशप्रकाशः)

जातकस्य केन्द्रभावेषु त्रिकोणभावेषु च कर्मेशेन सह अन्ये चत्वारः ग्रहाः स्थिताः अथवा कर्मस्थाने चत्वारः ग्रहाः वर्तन्ते चेत् जातकः निश्चयेन सन्यासी भवति।

***यशस्विमुनियोगः -***

**सितेन्दुजीवार्कजलोहिते सितार्कभौमार्कीशशाङ्कसोमजैः।**
**एकत्र यातैर्गगनचरैः सदा भवन्ति जाता मुनयः यशस्विनः।।10।।**

(सारावल्यां विंशाध्यायः)

यदि कुण्डल्यां शुक्रचन्द्रगुरुशनिसूर्यकुजाः अथवा शुक्रसूर्यभौम-शनिशशाङ्कबुधाः एकराशिंगताः तदा जातकः यशस्विमुनिः भवति।

**सन्दर्भग्रन्थसूची -**

जातकपारिजातः
सारावली
सर्वार्थचिन्तामणिः
दैवज्ञाभरणम्
ज्योतिषशास्त्रेतिहासः